पीतकद्रुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः ।) हरिद्रुवृक्षः । इति राजनिर्घण्टः ॥ (हरिद्रुशब्देऽस्य विवरणं विज्ञेयम् ॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतकरवीरकः, पुं, (पीतः करवीर इति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) पीतवर्णकरवीरपुष्पवृक्षः । तत्पर्य्यायः । पीतप्रसवः २ सुगन्धिकुसुमः ३ । अस्य गुणाः । सामान्यकरवीरगुणतुल्याः । इति राजनिर्घण्टः ॥

पीतकावेरं, क्ली, (कुत्सितं वेरं शरीरं कावेरम् । पीतं कावेरं कुत्सितशरीरमपि यस्मात् ।) कुङ्कुमम् । पित्तलम् । इति मेदिनी । रे, ३०५ ॥ (विवृतिरस्य कुङ्कुमपित्तलशब्दयोर्ज्ञेया ॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः ।) पीतचन्दनम् । इति राजनिर्घण्टः ॥

पीतकीला, स्त्री, (पीता कीला कीलतुल्या लतेति नित्यकर्म्मधारयः ।) आवर्त्तकीलता । इति राजनिर्घण्टः ॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्या इति पीता पीतपुष्पेत्यर्थः । ततः पीता घोषेति कर्म्मधारयः ।) पीतपुष्पघोषालता । इति रत्नमाला ॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः ॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः ।) पीतवर्णचन्दनम् । तत्तु द्रविड़देशे प्रसिद्धम् । कलम्बक इति ख्यातम् । तत्पर्य्यायः । पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ बर्ब्बरम् ८ । इति राजनिर्घण्टः ॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५ । अस्य गुणाः । रक्तचन्दनगुणतुल्यगुणत्वम् । व्यङ्गनाशित्वञ्च । इति भावप्रकाशः ॥ शीतलत्वम् । तिक्तत्वम् । कुष्ठश्लेष्मकण्डूविचर्च्चिकादद्रुक्रिमिनाशित्वम् । कान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥

पीतचम्पकः, पुं, (पीतं चम्पकमिव शिखा यस्य ।) प्रदीपः । इति जटाधरः ॥ (पीतं चम्पकं तत्पुष्पमस्य ।) पीतवर्णचम्पकपुष्पवृक्षश्च ॥

पीततण्डुलः, पुं, (पीतस्तण्डुलोऽस्य ।) कङ्गुनी । इति राजनिर्घण्टः ॥

पीततण्डुला, स्त्री, (पीतस्तण्डुलोऽस्याः ।) चविकावृक्षः । इति राजनिर्घण्टः ॥

पीततुण्डः, पुं, (पीतं तुण्डं यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । चञ्चुसूचिः २ सुगृहः ३ । इति त्रिकाण्डशेषः ॥

पीतता, स्त्री, (पीत + तल् + टाप् ।) हरिद्राभता । पीतत्वम् । पीतशब्दात् भावार्थे तप्रत्ययनिष्पन्ना । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १४६ । २६ ।
"द्वापरेऽपि युगे धर्म्मो द्विभागो नः प्रवर्त्तते ।
विष्णुर्वै पीततां याति चतुर्द्धा वेद एव च ॥"

पीततैला, स्त्री, (पीतं तैलमस्याः ।) ज्योतिष्मती लता । इति जटाधरः ॥ महाज्योतिष्मती । इति राजनिर्घण्टः ॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति ।) देवदारु । इत्यमरः । २।४।५३॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
देवकाष्ठम्पीतदारु देवदारु च दारु च ॥"
इति वैद्यकरत्नमालायाम् ॥)
सरलः । इति रत्नमाला ॥ हरिद्रुः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ॥
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्या यया वा । धेनुष्या । दुग्धबन्धके संस्थिता गौः । इति हेमचन्द्रः ॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः । कटुपर्णी । चोक इति भाषा ॥ यथास्याः पर्य्यायः ।
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतद्रुः, पुं, (पीतो द्रुरिति नित्यकर्म्मधारयः ।) सरलवृक्षः । दारुहरिद्रा । इत्यमरः । २।४।६०, २।४।१०१ ॥ (यथास्य पर्य्यायः ।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतनं, क्ली, (पीतं करोतीति । तत्करोतीति णिच् । ततो ल्युः । यद्वा, पीतं पीतवर्णं नयतीति । नी + डः ।) कुङ्कुमम् । (यथा, श्रीकण्ठचरिते । ६ । ३४ ।
"अपहृत्य पीतनमशेष-
ममरसुदृशां शरीरतः ।
भीत इव गहनगाभिगुहा
प्रपलाय्य तूर्णमविशत् पयोभरः ॥")
हरितालम् । पीतदारु । इत्यमरमेदिन्यौ ॥

पीतनः, पुं, (पीतं करोतीति । णिच् । ततो ल्युः ।) प्लक्षः । इति राजनिर्घण्टः ॥ आम्रातकः । इति मेदिनी । ने, ६२ ॥ (नन्दीवृक्षः । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च पीतनः ।
गन्धभाण्डो गन्धमुण्डो द्वितीयः क्षिप्रपाक्यसौ ॥")

पीतनकः, पुं, (पीतन एव । पीतन + स्वार्थे कन् ।) आम्रातकः । इति राजनिर्घण्टः ॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः । ङीष् ।) वृश्चिकाली । इति शब्दचन्द्रिका ॥ विछिटि इति भाषा ॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः ।) शारिकापक्षी । इति हेमचन्द्रः ॥ पीतचरणयुक्ते, त्रि ॥

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥ (कुष्माण्डम् । तत्पर्य्यायो यथा भावप्रकाशे ।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं बृहत्फलम् ॥")
हरिद्राभकुसुमञ्च ॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ चम्पकवृक्षः । इति राजनिर्घण्टः ॥ पीतझिण्टी । पिण्डीतकभेदः । इति रत्नमाला ॥ (इङ्गुदीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"पीतपुष्पोऽङ्गारपुष्प इङ्गुदी तापसप्रियः ॥"
राजकोषातकी । तत्पर्य्यायो यथा, भावप्रकाशे ।
"धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोषातकी चेति तथोक्ता राजिमत्फला ॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः ।) इन्द्रवारुणी । झिण्टिरिटाक्षुपः । आढ़की । इति राजनिर्घण्टः ॥ (महाबला । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"ज्यष्टप्रोक्ता त्वतिबला पीतपुष्पा महाबला ॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः । जातित्वात् ङीष् ।) शणपुष्पी । सहदेवी । महाकोषातकी । त्रपुषी । इति राजनिर्घण्टः ॥

पीतफलः, पुं, (पीतानि फलानि यस्य ।) शाखोटवृक्षः । इति त्रिकाण्डशेषः ॥ कर्म्मारवृक्षः । इति राजनिर्घण्टः ॥

पीतफलकः, पुं, (पीतफल एव । स्वार्थे कन् ।) शाखोटवृक्षः । इति भावप्रकाशः ॥

पीतवालुका, स्त्री, (पीता वालुकेव चूर्णंरजो यस्याः ।) हरिद्रा । इति त्रिकाण्डशेषः ॥ पीतवर्णसिकता च ॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः ।) मेथिका । इति राजनिर्घण्टः ॥ पीतवर्णबीजयुक्ते, त्रि ॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः ।) पीतभृङ्गराजः । पीत केशुरिया इति भाषा । तत्पर्य्यायः । स्वर्णभृङ्गारः २ हरिप्रियः ३ देवप्रियः ४ वन्दनीयः ५ पावनः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामशोफनाशित्वम् । तथा नीलो रसायनः । इति राजनिर्घण्टः ॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः ।) पुष्परागः । इति राजनिर्घण्टः ॥ (पुष्परागशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम् ।) माक्षिकम् । इति राजनिर्घण्टः ॥

पीतमुद्गः, पुं, (पीतः पीतवर्णो मुद्गः ।) मुद्गविशेषः । सोणा मुग इति भाषा । तत्पर्य्यायः । वसुः २ खण्डीरः ३ प्रवेलः ४ जयः ५ शारदः ६ । इति हेमचन्द्रः । ४ । २३८ ॥